त्रैमासिकी / सप्टम्बर् २०२१

# गीर्वाणपत्रिका

जयति जयति गीर्वाणी सरस्वती सुरसवती । सारस्वतजनमोहिनी संस्कृतसुविलासिनी ॥

## ॥ गुरूपदेशः ॥



दशमगुरु-परमपूज्य-
श्रीमत्-परिज्ञानाश्रम-स्वामिवर्यः ।

भवतां मनः निरन्तरं भगवदन्वेषणे निरतं भवेत् ।
तदैव संसारः ससारः
- व्यवहर्तुं सुकरः अर्थपूर्णः च भवति ।



एकादशगुरु-परमपूज्य-
श्रीमत्-सद्योजातशङ्कराश्रम-स्वामिवर्यः ।

व्यवहारे सर्वदा सतर्कः भवितव्यः ,
यत् प्रचलदस्ति तद्विषये सचेताः भवितव्यः ,
तथैव अस्माकं मार्गदर्शनं साहाय्यं रक्षणं च कुर्वत्याः
दिव्यशक्तेः सान्निध्यम् अपि अभिज्ञातव्यम् ।

गुरूपदेशानुवादः – सुजाता हळदीपुर, मुम्बई

## निवेदनम्

गीर्वाणपत्रिकायाः द्वितीय-अङ्कं वयं श्रीचरणयोः समर्पयामः।

बहुभ्यः वर्षेभ्यः गीर्वाणप्रतिष्ठा संस्कृत-अध्यापने , प्रचारे च कार्यरता अस्ति । कालान्तरेण अध्यापक-अध्येतृणां सङ्ख्या वृद्धिङ्गता । तदा तेषां सर्जनात्मक-अभिव्यक्तेः आविष्कारः भवेत्, संस्कृताभिमानिनां मनसि देवभाषां प्रति स्नेहः वर्धेत च इति सङ्कल्पना स्फुरिता । इयं गीर्वाणपत्रिका अस्याः सङ्कल्पनायाः मूर्तस्वरूपम् । श्रीगुरुवर्याणाम् अनुग्रहेण एव इदं सफलीभूतम्।

इयं गीर्वाणपत्रिका न तु केवलं प्रौढानां कृते अपि तु बालानां कृते च मोदप्रदा भवेत् इति मनसि निधाय पत्रिकां साकारयितुम् अस्माकम् अयं लघुप्रयत्नः ।

अयं सञ्चारनिर्बन्धकालः साधकानां कृते अन्तर्मुखः भवितुम् एकः अवसरः सञ्जातः। आधुनिक-तन्त्रशास्त्रस्य साहाय्येन जालपुटमाध्यमेन परस्परसम्पर्कः प्रचलन्नस्ति । इयं गीर्वाणपत्रिका जनसम्पर्कसाधनस्य एका उदाहृतिः ।

साम्प्रतं परमपूज्य-सद्योजातशङ्कराश्रम-स्वामिवर्याणां चातुर्मासव्रताचरणार्थं मल्लापुरमठे निवासः वर्तते । सञ्चारनिर्बन्धवशात् गुरुपौर्णिमायां तेषां साक्षात् दर्शनभाग्यं न लब्धम् । किन्तु तद्दिने प्रभूतैः साधकैः स्वगृहतः एव समकालं श्रीगुरुपूजनं कृतम् , श्रद्धया स्वामिवर्येभ्यः समर्पितं च । अस्य आन्तर्जालमाध्यमेन सद्यस्क- प्रसारणं सञ्जातम् । तस्मात् गुरुपूजनेन सामूहिकं रूपं प्राप्तम् । अनेन दिव्यगुरुपूजनेन प्रमुदिताः वयं सर्वे , दूरस्थाः अपि , दृढ-अनुबन्धक-भावम् अनुभूतवन्तः । ईदृशानि बहुविधकार्याणि अस्माकं मनोबलं वर्धयितुं साहाय्यं कुर्वन्ति ।

अयं श्रावणमासः । सर्वत्र हरिता भूमिः , विकसितपुष्पसुशोभितलताः दृश्यन्ते । अस्मिन् मङ्गलमयवातावरणे वाचकानां मनः अपि विकसितं भवेत् , तेषां संस्कृतानुरागः पल्लवितः पुष्पितः भवेत् च इति श्रीचरणेषु प्रार्थना ।

– सम्पादिका

# गुरुस्तवनम्

**- वृन्दा चन्दावर , मुम्बई**

**परिज्ञानाश्रमगुरुवर्यः** यतिवराणां वरेण्यः ।

**परिज्ञानाश्रमगुरुवर्यं** वन्दे सारस्वतगुरुम् ।

**परिज्ञानाश्रमगुरुवर्येण** प्रतिहन्यते कलिमलम् ।

**परिज्ञानाश्रमगुरुवर्याय** भर्गाय ते नमः ।

**परिज्ञानाश्रमगुरुवर्यात्** त्रस्यति कलिकालभुजङ्गः ।

**परिज्ञानाश्रमगुरुवर्यस्य** पदाम्बुजं भवाब्धितारकम् ।

**परिज्ञानाश्रमगुरुवर्ये** चित्तं सततं भवतु मे ।

**परिज्ञानाश्रमगुरुवर्य** भवानेव ममाश्रयः ॥

## चिन्तनम्

**– गौरी येन्नेमिडी , मुम्बई**

अधोनिर्दिष्टं सुभाषितम् अधिकृत्य गतजूनमासे गीर्वाणप्रतिष्ठया आयोजिते चिन्तने बहवः सदस्याः सहभागं गृहीतवन्तः । सर्वैः प्रकटितानां स्वमतानां सारांशः अधः दीयते ।

यथा चतुर्भिः कनकं परीक्ष्यते
निघर्षणच्छेदनतापताडनैः ॥
तथा चतुर्भिः पुरुषः परीक्ष्यते
श्रुतेन शीलेन गुणेन कर्मणा ॥

अस्मिन् सुभाषिते मनुष्यस्य गुणवत्ता-परीक्षायाः तुलना सुवर्णस्य परीक्षया सह कृता अस्ति ।

कनकं मौल्यवान् धातुः । अतः तस्मिन् अन्यपदार्थस्य मिश्रणम् अस्ति वा इति निर्धारयितुं तापन-ताडन-छेदन-निघर्षण-प्रक्रियाभिः तस्य शुद्धतायाः परीक्षा भवति ।

१ ) तापनम् – खनितः प्राप्तं कनकं कलुषितम् अस्ति । अतः प्रथमं तस्य तापनं कृत्वा शुद्धीकरणं भवति । तापनेन तस्मिन् यानि कल्मषाणि सन्ति तानि सर्वाणि प्रज्ज्वाल्य भस्मीभवन्ति ।

२ ) घर्षणम् – अग्निना शुद्धीकृतं काञ्चनं सुवर्णकारः शाणाश्मना घर्षयित्वा पुनः निर्धारयति यत् तत् पूर्णतया शुद्धीभूतं वा न इति ।

३ ) ताडनम् – कनकपरीक्षायाः तृतीयः स्तरः अयम् । तस्य शुद्धत्वं संनिश्चित्य सुवर्णकारः तत् पुनः तापयित्वा ताडयति । एतया प्रक्रियया मृदुभूतं सुवर्णं प्रसारणं प्राप्य तस्य चतुर्थपरीक्षायाः कृते सिद्धं भवति ।

४ ) छेदनम् – अन्ते मृदुत्वप्राप्तस्य सुवर्णस्य छेदनं भूत्वा तत् विविधाभरणानां निर्माणस्य कृते सिद्धं भवति । प्राकृतिककनकस्य अपेक्षया आभरणानां मूल्यम् अधिकम् ।

तथैव ज्ञान-शील-गुण-कर्मणां निकषेण मनुष्यस्य अपि चतुर्विधा परीक्षा भवति ।

१ ) ज्ञानम् - कस्यापि पुरुषस्य ज्ञानपरीक्षा तस्य वाण्यैव। तस्य परिपक्वता वाण्यां दृश्यते । विनम्रता, विवेकशीलता , ध्येयं प्रति एकाग्रता , गुरून् प्रति श्रद्धा च एतानि ज्ञानलक्षणानि वाण्यां सुस्पष्टानि प्रकटीभवन्ति ।

२ ) शीलम् - एतत्तु साधुपुरुषस्य आभरणम् एव । आर्जवं , सत्यप्रियता , त्यागः , क्षमा , उदारता , संवेदनशीलता च एतैः लक्षणैः मनुष्यस्य सुशीलतायाः परीक्षा भवति ।

३) गुणाः – " मनुष्यस्य गुणाः एव तस्य अभिज्ञा " इति यथार्थम् उच्यते । गुणाः त्रिधा – सत्त्वगुणः रजोगुणः तमोगुणः च । कश्चन मनुष्यः स्वप्रयत्नेन सत्त्वप्रधानगुणान् सम्प्राप्य शम-दमादिभिः साधनैः आत्मोन्नतिं साधयितुम् अर्हति ।

४) कर्म – कर्मणा अपि कस्यचित् स्वभावपरीक्षणं भवति । निःस्वार्थी तथा निष्कामकर्म कुर्वन् पुरुषः लोकहिते सदा निरतः । यथा आभरणानि घर्षणात् कान्तिं प्राप्नुवन्ति तथा सः मनुष्यः सेवाकार्ये पदे पदे विघ्नान् संघर्षान् च सम्मुखीकृत्य ओजस्वितां प्राप्नोति । तस्मात् आत्मबलं वर्धयित्वा सः सहनशीलः भवति सर्वान् समानतया स्वीकरोति च ।

यथा कनकं कठोरपरीक्षायाः पश्चात् प्रचुरं मूल्यं प्राप्नोति तथैव ज्ञानशीलगुणकर्मभिः मनुष्यस्य साधनापथे प्रगतिः भवति । अयं मनुष्यः गुरुसान्निध्यं प्राप्नोति चेत् जीवने अन्तिमध्येयं प्राप्तुम् अर्हति ।

# अमृतयोगः

**– नारायण शिराली, मुम्बई**

( परमपूजनीय-सद्योजातशङ्कराश्रमाणां मुम्बापुरी-निवासः । )

सद्योजातशङ्कराश्रम-चरणरजसा स्पर्शितम्
दर्शनोत्सुकसाधकैः भक्तिसागर-पूरितम् ।
पुष्पमालामण्डपेन सुभगनगरं शोभितम्
पावन-आगमनेन जातं पुण्यश्लोकम् अलङ्कृतम् ॥१॥

पापनाशक-पुण्यसाधक-धर्मरक्षण-संस्थिता
सूर्यसमतेजस्विता पापराशि-निखण्डिता ।
चन्द्रशीतल-हास्यवदना वेदज्ञान-विमण्डिता
सद्गुरुरूपेण साक्षात् शम्भुमूर्तिः समागता ॥२॥

भक्तिपूरित-मानसाः कृतप्रबन्धा अहर्निशम्
मनननामस्मरणपूजन-विविधसेवा-सुव्रताः ।
अल्पकालनिवासेन भृशं च परितोषिताः
आशीर्वचःप्रसादेन साधकाः भाग्यशालिनः ॥३॥

# मूकङ्करोतिवाचालम्

– उदया माविनकुर्वे , बेङ्गळूरु

कदाचित् श्रीशङ्करभगवत्पादाः दक्षिणभारतस्य परिक्रमणं कुर्वन्तः श्रीबली- अग्रहारं (आधुनिकः शिरालीग्रामः) प्राप्तवन्तः। कस्यचित् विशालस्य वटवृक्षस्य अधः उपविष्टवन्तं तेजोराशिं संन्यासिनं दृष्ट्वा सर्वेऽपि ग्रामीणाः आकर्षिताः बभूवुः।

तेषु कश्चित्प्रभाकरपण्डितः मूकस्वपुत्रेण सह श्रीशङ्करभगवत्पादान् साष्टाङ्गं नमस्कृत्य एवम् उवाच – " प्रभो, अयं मे सप्तवर्षीयः पुत्रः मूकः जडबुद्धिश्च । द्विजः सन्नपि वेदान्नैव अधीतवान् । अक्षरमालामपि न जानाति। क्रीडापरबालैः आहूतोऽपि क्रीडितुं न याति। शठा बालाः एनं निरीक्ष्य संताडयन्ते । तथापि न प्रतिक्रियते अनेन। इच्छाविहारी अयं कदाचिन्न भुङ्क्ते एव। अहोरात्रम् अन्तर्मुख एषः उक्तन्न शृणोति नैव करोति। भो गुरुवर, भवतः करुणामयदृष्ट्या एनं मन्दमतिबालकम् उद्धरतु, अस्य बुद्धिं प्रज्ज्वालयतु ।"

शङ्कराचार्याः मूकबालकम् उद्दिश्य ऊचुः –
" कस्त्वं शिशो कस्य कुतोऽसि गन्ता किं नाम ते त्वं कुत आगतोऽसि ?
एतन्मयोक्तं वद चार्भक त्वं मत्प्रीतये प्रीतिविवर्धनोऽसि ।"

तदा बालः मधुरस्वरेण प्रत्यवदत् –
" नाहं मनुष्यो न च देवयक्षौ न ब्राह्मणक्षत्रियवैश्यशूद्राः,
न ब्रह्मचारी न गृहीवनस्थौ भिक्षुर्नचाहं निजबोधरूपः,
स नित्योपलब्धिस्वरूपोऽहमात्मा ।"

विना उपदेशम् आत्मबोधप्राप्तस्य बालकस्य बोधपूर्णम् उत्तरम् आकर्ण्य विस्मिताः
भगवत्पादाः एवम् ऊचुः –
" द्विजवर्य , अयं त्वत्पुत्रः युष्माभिः सह निवसितुं न योग्यः। एनं मदीयः शिष्यत्वेन स्वीकरिष्ये। एतस्य तु परिज्ञानं हस्ते स्थितम् आमलकमिव स्पष्टमस्ति। इतः परं सः हस्तामलकेति विश्वविख्यातो भविष्यति।"

सिद्धानां वचनानि सिद्ध्यन्ति एव ननु ।

गच्छता कालेन , एष अद्भुतबालकः श्रीहस्तामलकाचार्यः इति पूर्वस्यां दिशि स्थितस्य श्रीगोवर्धन-आम्नायमठस्य जगत्प्रसिद्धः प्रथमाचार्यः बभूव ।

अद्यापि शिरालीग्रामे, श्रीचित्रापुरमठात् अनतिदूरं हस्तामलकमन्दिरमिति पुरातनमेकं मन्दिरं वर्तते ।

## सुभाषितम्

- सुजाता हळदीपुर, मुम्बई

उदयति यदि भानुः पश्चिमे दिग्विभागे प्रचलति यदि मेरुः शीततां याति वह्निः ।
विकसति यदि पद्मं पर्वताग्रे शिलायां न भवति विपरीतं भाषितं सज्जनानाम् ॥

भावार्थः -

यद्यपि सूर्यः पूर्वदिशि न उदित्वा पश्चिमदिशि उदयति, मेरुपर्वतः यः अचलः सः चलन् भवति, यस्य गुणविशेषः तापः सः अग्निः शीतलतां विकीर्यते ; एते सर्वे स्वगुणान् त्यक्त्वा विपरीताः भवन्ति तथापि सज्जनाः यद् तैः सकृदुक्तं तस्मात् कदापि विचलिताः न भवन्ति ।

## गीर्वाणवैखरी

'वदाम संस्कृतम्' गीर्वाणवैखर्याः ध्येयवाक्यम् ।

परमपूज्यानां गुरुवर्याणाम् आशिषा मार्गदर्शनेन च गीर्वाणप्रतिष्ठा देवभाषायाः प्रसारप्रचारकार्ये निरता अस्ति । तस्याः प्रारम्भिकस्तरीय-पाठ्यक्रमेषु अन्यतमा गीर्वाणवैखरी ।

श्रवणं भाषणं पठनं लेखनं च भाषाध्ययनस्य महत्त्वपूर्णाः अङ्गाः । संस्कृतपठनार्थं लेखनार्थं च बहवः जनाः प्रवृत्ताः भवन्ति, किन्तु संस्कृतेन सम्भाषणं कठिनमिति नैकेषां मतिः । अतः संस्कृत-सम्भाषणाय प्रोत्साहनं दातुं मनोरञ्जकरूपेण सरलसंस्कृतस्य पाठनं भवेत् इत्यनया संकल्पनया गीर्वाणवैखर्याः रचना कृता अस्ति।

मासचतुष्टयस्य अस्मिन् अभ्यासक्रमे प्रतिसप्ताहं वर्गः प्रवर्तते । सार्धैक-घण्टात्मके जालाधारित-वर्गे छात्राः सरलवाक्यरचनां शिक्षन्ति । कस्यामपि भाषायां स्वविचारान् प्रकटीकर्तुं शब्दसंग्रहः आवश्यकः । अतः छात्राणां शब्दसंपत्ति-वर्धनम् अपि एकं लक्ष्यम् । अभ्यासान्तरगतं वर्तते दैनन्दिन-व्यवहारे उपयुक्तानां नैकेषां शब्दानां पठनम् । देवभाषा व्यवहारभाषा भवितव्या इति अतः छात्रेभ्यः यावत् शक्यं संस्कृतेन एव चिन्तनं कुर्वन्तु इति प्रोत्साहनं दीयते ।

केचन छात्राः संस्कृतस्य पूर्वज्ञानं विना वर्गे उपतिष्ठन्ति अन्ये च संस्कृतज्ञाः । गणद्वयमपि गीर्वाणवैखरी-वर्गे संस्कृतस्य श्रवणे भाषणे च रमन्ते । व्यक्तिगतं तथा गणशः अपि सर्वे कथाः संवादान् च प्रस्तुतीकुर्वन्ति । जालाधारिते वर्गे भिन्नभिन्नप्रान्तेषु देशेषु च निवसन्तः संस्कृतानुरागिणः सम्मिलन्ति परस्परं परिचयेन सन्तोषम् अनुभवन्ति च । संवादात्मक-क्रीडासु सानन्दं सहभागं गृहीत्वा संस्कृतेन सम्भाषन्ते ।

एवं संस्कृतास्वादनेन आनन्दिताः छात्राः संस्कृताभ्यासे स्तरवर्धनाय स्पृहयन्ति । ते छात्राः प्रबोध-वर्गेषु अग्रिमस्तरीयं संस्कृत-व्याकरणाभ्यासं कर्तुं शक्नुवन्ति ।

- पाठ्यक्रमस्य-विषय
  **https://chitrapurmath.net/site/activities-girvanaprathistha-online-classes**
  इत्यस्मिन् जालपृष्ठे अधिकं जानन्तु ।
- जालाधारित-सम्भाषणवर्गस्य पञ्जीकरणार्थं सम्पर्कः -
  **Email id: girvanavaikhari@chitrapurmath.net.in**

# भासः

**– कृष्णानन्द मङ्कीकर , मुम्बई**

भासः एकः महान् नाटककारः इति प्रख्यातः । स्वप्नवासवदत्तम् इति तस्य नाटकं चिरकालं प्रसिद्धमेव । दैवयोगवशात् ख्रिस्ताब्दस्य १९१२ वर्षे भासमहाकवेः १३ कृतयः ' टी. गणपतिशास्त्री ' नाम्ना विदुषा उपलब्धीकृताः । एतासां कृतीनां रचनायाः साम्यं " **स्वप्नवासवदत्तम्** " इत्यस्य नाटकस्य लेखनशैल्या परीक्ष्य एताः कृतयः भासस्यैव इति कतिपयाः विद्वांसः मन्यन्ते ।

भासस्य अद्वितीयं स्थानम् अनेकैः पुरातनैः कविभिः स्वकृतिषु निर्दिष्टमस्ति ।

" **प्रथितयशसां भाससौमिल्लककविपुत्रादीनां प्रबन्धानतिक्रम्य वर्तमानकवेः कालिदासस्य क्रियायां कथं बहुमानः ?** " इति स्वयं कालिदासेनैव तस्य "मालविकाग्निमित्रम्" इत्यस्य नाटकस्य प्रारम्भे एव भासस्य उल्लेखं कृत्वा तस्मै मानवन्दना व्याहृता ।

न केवलं कालिदासेन परन्तु , बाणभट्टेन उक्तं " **भासो देवकुलैः इव यशो लेभे** "। दण्डिना लिखितम् " **परेतोऽपि स्थितो भासः शरीरैरिव नाटकैः** " **(स्वर्गगतोऽपि नाटकरूपेण शरीरवत् स्थितः भासः इत्यर्थः) ।** जयदेवः भासनाटकेषु विदूषकेण उक्तानि वाक्यानि दृष्ट्वा भासस्य उल्लेखं " **भासो हासः** " इति करोति । तथा अन्यैः कविभिः भासस्य सादरं कृतः उल्लेखः तस्य उच्चतमं स्थानं दर्शयति । यदा एतावताः कवयः भासं विविधरूपैः वर्णयन्ति, तदा भासः एतेषां गुरुरेव वा इति मन्यामहे । भास: अर्वाचीननाटकस्य जनकः एव इति कतिपयाः विद्वांसः मन्यन्ते ।

भासस्य प्रभावः तस्य उपरान्तम् आगतानां कवीनां कृतिषु विशेषरूपेण दृश्यते । कालिदासस्य रघुवंशे शाकुन्तले कुमारसंभवे च अनेकानि साम्यस्थलानि विद्वद्भिः दर्शितानि । यत् भासः लिखति स्वप्नवासवदत्ते " **चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः** " तदेव कालिदासेन कथितम् उत्तरमेघे " **नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण** " । नैकाः पङ्क्तयः एव समाः । अनेकैः विद्वद्भिः भासस्य नाटकविषये अभ्यासपूर्णं लेखनं कृतमस्ति । तेषु ग्रन्थेषु डॉ. जगदीश-दत्त-दीक्षितमहोदयेन लिखितः अत्यन्तम् अभ्यासपूर्णः प्रबन्धः अतीव वाचनीयः एव । महोदयेन अनेकानि साम्यस्थलानि उदाहृतानि ।

भासनाटकेषु पञ्च नाटकानि महाभारताधारितानि, रामायणाधारिते द्वे , कृष्णस्य विषये एकं तथा च बृहत्कथासरित्सागराधारितानि चत्वारि नाटकानि लिखितानि सन्ति । सर्वासु कृतिषु प्रसिद्धं नाटकं " **स्वप्नवासवदत्तम्** " इति । भासस्य कृतिषु अनेके रसाः यथा करुणः शृङ्गारः हास्यः इत्यादयः दृश्यन्ते। एकमेव उदाहरणं पश्यामः " **योऽस्याः करः श्राम्यति दर्पणेऽपि स नैति खेदं कलशं वहन्त्याः ॥** " इति वनवासिन्याः सीतायाः करुणरसपूर्णं परन्तु अतीव शोभनं वर्णनं पश्यन्तु ।

भासोऽयमेकः महाकविः । तस्य विषये एतस्मिन् लघुपुटे कथनमशक्यमेव परन्तु स्थलाभावात् अत्रैव विरमामि ।

शुभं भवतु ।

बालरञ्जनी

# जलबिन्दोः यात्रा

**- शिल्पा मुद्गुर, मुम्बई**

आसीत् ग्रीष्मकालः । सूर्यः आकाशे अतपत् । तस्य तापेन एकः जलबिन्दुः महासागरात् उत्थितः । उपर्युपरि गच्छन् सः अधः दृष्टवान् । अहो, कियत् सुन्दरं दृश्यं पृथिव्याः ! पर्वताः , नद्यः, वनानि च दृश्यन्ते । जलबिन्दुना चिन्तितम् – ' एतावत्कालं महासागरे एव आसीत् मम निवासः । अधुना मुक्तः अहम् आकाशे यथेष्टं विहारं करोमि । '

तावता अन्ये जलकणाः तत्र समागताः । जलबिन्दुः स्वं परितः दृष्टवान् । जलकणाः मिलित्वा मेघरूपं धारितवन्तः । शनैः शनैः सर्वत्र नीलमेघाः सञ्जाताः । दिवाकरः सगर्वं सर्वान् अपश्यत् । तदा पवनः सस्मितं तान् अवदत् – ' वत्साः , सर्वे भूमिं गन्तुं सिद्धाः खलु । ' एवमुक्त्वा सः तान् प्रणुदितवान् ।

जलबिन्दुः संभ्रान्तः अभवत् । सः समीपस्थं मित्रम् अपृच्छत् – ' अयि, मरुत् अस्मान् कुत्र नयति ? ' सः जलकणः प्रत्यवदत् – 'भूमिं प्रति । तत्र प्राणिनः अस्माकं प्रतीक्षां कुर्वन्ति ननु । '









जलबिन्दुः – ' किमर्थम् ? '

मित्रम् – ' ते जलेन विना जीवितुं न शक्नुवन्ति । वयमेव प्राणिनां साहाय्यं कर्तुं शक्नुमः । '

जलबिन्दुः – ' कथम् ? वयं तु क्षुद्राः बिन्दवः । '

मित्रम् – ' लघुबिन्दवः वयं जलदानां महत्त्वपूर्णाः अंशाः । पर्जन्यवर्षणम् अस्माकं कर्तव्यम् । यदा वयं मिलित्वा




क्षेत्रेषु जलवर्षणं कुर्मः तदा सस्यानि वर्धन्ते । यदा नदीः जलाशयान् च पूरयामः तदा मानवाः पशवः खगाः च आनन्दिताः भवन्ति । तेषां कृते जलमेव जीवनम् । '

जलबिन्दुः – ' किन्तु अहं कञ्चित् कालम् एकलः विश्वपर्यटनं कर्तुमिच्छामि । '

मित्रम् – ' त्वमेव चिन्तय । मार्गदर्शनेन विना साहसं करिष्यसि चेत् पुनः महासागरे एव पतिष्यसि । त्वं सूर्यतापेन तप्त्वा बाष्पीभूय च अत्र प्राप्तवान् खलु । स्वपरिश्रमं किमर्थं विफलीकरोषि ? ' परोपकारार्थं यो जीवति स जीवति' इति कथ्यते । '

जलबिन्दुः अचिन्तयत् – ' सत्यं खलु । निसर्गचक्रे मम विशेषं स्थानमस्ति । अल्पोऽपि मम प्रयासः यदि अन्येषाम् उपकारकः तर्हि तदेव वरम् । तस्मात् यथा मरुत् आदिशति तथैव करोमि । एषा यात्रा अपि आह्लादकरी स्यात् इति मन्ये । '

ततः जलबिन्दुः सोत्साहम् उक्तवान् – ' रे मित्र, आगच्छामि त्वया सह । प्रथमभूमिस्पर्शाय स्पर्धा भवेद् वा ? '

## सार्थसमानार्थः

विकीर्णाक्षरेभ्यः पर्यायशब्दान् विरचयन्तु

| | | | | | |
|---|---|---|---|---|---|
| **सूर्यः** | क | दि | वा | रः | |
| | | | | | |
| **पवनः** | मी | स | रः | | |
| | | | | | |
| **जलम्** | द | म् | उ | क | |
| | | | | | |
| **समुद्रः** | रा | ज | शिः | ल | |
| | | | | | |
| **जलदः** | वा | वा | हः | रि | |
| | | | | | |
| **पर्जन्यः** | पा | य | तः | तो | |
| | | | | | |
| **भूमिः** | नी | अ | व | | |
| | | | | | |
| **पर्वतः** | भृ | त् | भू | | |
| | | | | | |
| **नदी** | टि | त | नी | | |
| | | | | | |
| **वनम्** | म् | ण् | र | अ | य |
| | | | | | |

(उत्तराणि अन्तिमपृष्ठे दत्तानि।)

## हास्यकणिका

सर्वेक्षणार्थम् आगतः नूतन-विक्रेता गणुं पृच्छति ;

विक्रेता – भवान् स्नानार्थं कस्य फेनकस्य उपयोगं करोति ?

गणुः – प्यारेलालस्य नीमफेनकम् ।

विक्रेता – श्मश्रुकर्मणे ?

गणुः – प्यारेलालस्य जम्बीरफेनकम् ।

विक्रेता – दन्तमार्जनार्थम् ?

गणुः – प्यारेलालस्य लवङ्ग-दन्तफेनकम् ।

विक्रेता – केशतैलम् ?

गणुः – प्यारेलालस्य कर्पूरयुक्ततैलम् ।

विक्रेता – इयं " प्यारेलाल " नाम्नी बहुराष्ट्रीय-संस्था वा जनप्रिय- स्थानीय-संस्था वा ?

गणुः– न , न । प्यारेलाल छात्रावासे मम कक्षभागी ।

## परिपृच्छा

**योग्यं पर्यायं चिनोतु -**

१ यदा वसुदेवः बालकृष्णं कारागृहतः नन्दस्य गृहं नीतवान् तदा मार्गे का नदी आसीत् ?

☐ नर्मदा ☐ कावेरी ☐ यमुना

२ अतिवृष्टितः गोकुलवासिनां रक्षणार्थं श्रीकृष्णः पर्वतम् उद्धृतवान् | कः सः पर्वतः ?

☐ गोवर्धनपर्वतः ☐ हिमालयपर्वतः ☐ मेरुपर्वतः

३ श्रीकृष्णस्य वर्णः नीलमेघः इव | तेन तस्य एकं नामधेयम्

☐ मधुसूदनः ☐ घनश्यामः ☐ नवनीतचोरः

# देवमानवाः

– अनुराधा कर्पे, पालघर

परदुःखं न्यूनीकर्तुं , परेषां साहाय्यं कर्तुम् आन्तरिकी ऊर्मिः येषु वर्तते, ईदृशाः देवमानवाः इतस्ततः दृश्यमानाः सन्ति ।

मार्गे यदा अपघातः भवति , तदा अपघाते आहतानां जनानां साहाय्यं , कियती अपि व्यस्तता भवतु नाम एते देवमानवाः अपङ्गानां मार्गोल्लङ्घनं , गर्ते पतितेभ्यः धैर्यं दत्त्वा समुपदेशनम् एवंविधानि अनेकानि कार्याणि निरन्तरं कुर्वन्तः सन्ति ।

कोविड-रोगोद्भवस्य समये , संचारनिर्बन्धः कालेऽपि एतेषां देवमानवानां पुनःपौन्येन दर्शनम् अभवत् । परिश्रमेण एव उदरपूरणं कुर्वतां कर्मकराणां वैतनिकानां कृते पाथेयस्य योजनां केचन कृतवन्तः । तेषां जीवनसंघर्षं न्यूनीकर्तुं केचन प्रयत्नरताः आसन् । केचन कोरोना-रुग्णानां कृते स्वजीवनं विपज्जनकपरिस्थित्यां पातयित्वा तेषाम् उपचारं सेवां च कृतवन्तः। प्राणवायोः उपलब्ध्यर्थम् अहोरात्रं निद्रामपि त्यक्त्वा प्रयासपूर्वकं निःस्वार्थतया प्रयतमानाः जनाः मरणासन्नरुग्णेभ्यः प्राणदानं कृतवन्तः ।

उदारमनसा अविरतं साहाय्यं कुर्वन्तः एते मानवाः अस्मद्सदृशाः सामान्यजनाः एव सन्ति । एतेषु मानवेषु स्थितं देवत्वम् अस्माभिः अभिज्ञातव्यम् । तेषां सम्माननं करणीयम् अस्माभिः । तेषां देवत्वस्य संवेदना अपि अनुभवितव्या अस्माभिः । तेषां देवत्वस्य सूक्ष्मतमः अंशः अस्मद्हृदि धारयितव्यः । पुण्यकार्यस्य एषा शृङ्खला अव्याहता परिचालितव्या । मानवतायाः तथा दिव्यसंवेदनायाः स्रोतः सदैव रक्षितव्यः अस्माभिः।

चक्षुषा मनसा वाचा कर्मणा च चतुर्विधम् ।
प्रसादयति यो लोकं तं लोकोऽनुप्रसीदति ॥

कविता

# श्रावणधारा

– निवेदिता कार्नाड कौशिक , मुम्बई

वसुधां परिमलयति
इन्द्रचापेन सृष्टिं भूषयति ।
मयूरकलापान् विकासयति
श्रावणमासस्य श्रावणधारा ॥ १ ॥

सुप्तं मनः जागरयति
ज्ञानसिन्धौ रुचिं जनयति ।
उज्ज्वलं प्रबोधयति
आत्मनः श्रावणधारा ॥ २ ॥

सराधेन रासलीलां कारयति
मीरां विरहप्रेम्णा व्याकुलयति ।
रुक्मिणीमनसि नन्दं प्रफुल्लयति
प्रेममयी श्रावणधारा ॥ ३ ॥

रत्नाकरेण सरितं सम्मेलयति
मनसि भक्तिं जनयति ।
गुरुचरणयोः चित्तं विलीनयति
मम हृदयस्य श्रावणधारा ॥ ४ ॥

# मम स्मृतिपटलतः ।

**– सुमन नागरकट्टी, पुणे**

केभ्यश्चित् वर्षेभ्यः पूर्वं घटिता घटना । मया गोवानगरं गन्तव्यम् आसीत् । पुणेतः ' निजामुद्दीन–गोवा ' रेलयानस्य यात्रापत्रम् आरक्षितमासीत् । अहम् उचितसमये यदा पुणे-रेलस्थानकस्य प्रथमक्रमाङ्कितां रेलवेदिकां प्राप्तवती तदा सूचनां श्रुतवती यत् गोवा-निजामुद्दीन-रेलयानं गन्तुं सिद्धम् अस्ति ।

अहं रेलयानस्य समीपं गतवती । मम कक्षक्रमाङ्कः पुरतः एव आसीत् । शीघ्रम् आरुह्य महिलाकक्षे मम आसन्दस्य अधः पेटिकां स्थापयित्वा शृङ्खलया तालेन च तां बद्ध्वा आसन्दे उपविष्टवती ।

मम पुरतः उपविष्टा एका बालिका किमपि खादन्ती आसीत् । तस्याः माता ताम् उक्तवती, "इदानीम् एव खाद्यानि समापयसि चेत् दिल्लीपर्यन्तं किमपि शेषं न भविष्यति । अनन्तरं रोदिष्यसि । अलं खादनेन ।"

दिल्लीपर्यन्तम् ? अहं तां पृष्टवती , " भगिनि , एतद् रेलयानं गोवां गच्छति किल ? " सा उक्तवती , " न , न ! एतद् तु गोवातः आगतम्, इतः दिल्लीं गच्छति । "

अयि भोः ! अहं शीघ्रं कुञ्चिकया तालम् उद्घाट्य पेटिकां गृहीत्वा द्वारं प्रति धावितवती । सा महिला माम् अनुसृत्य पेटिकां मम हस्तात् आदाय मां शीघ्रम् अवरोढुम् उक्तवती । रेलयानेन मन्दगमनम् आरब्धम् । अहं रेलयानतः वेदिकायां कूर्दितवती । सा महिला मह्यं पेटिकां दत्तवती । धावन्ती अहं पेटिकां कथञ्चित् प्राप्तवती । यथा यथा रेलयानेन शीघ्रगतिः प्राप्ता तथैव मम हृदयस्पन्दनेन अपि शीघ्रता प्राप्तासीत् ।

अतीव विचलितमनसा अर्धहोरान्तरेण अहं निजामुद्दीन-गोवा-रेलयाने मम स्थाने उपविष्टवती । दिष्ट्या , अन्ततः मया उचितं रेलयानं प्राप्तम् । तदा निश्चिन्तीभूय अहम् एताम् अनवधानेन घटितां घटनाम् आलोकितवती । तस्यै खादन्त्यै बालिकायै तां तर्जन्त्यै तस्याः मात्रे च मनसि एव नैकान् धन्यवादान् दत्तवती ।

कदाचित् आगन्तुकजनाः निमित्तं सम्भूय अस्मान् कठिनप्रसङ्गात् पारयित्वा निर्गच्छन्ति । अनन्तरं तेषां कदापि मेलनं न भवति । लुप्ताः इव भवन्ति ते ।

किन्तु ईदृशाः अनुभवाः अस्माकं मनसि आगन्तुकरूपेण साहाय्यं कृतवतीं दिव्यशक्तिं प्रति अवश्यं कृतज्ञताभावं वर्धयन्ति ।

## उत्तराणि

**सार्थसमानार्थः** - दिवाकरः , समीरः , उदकम् , जलराशिः , वारिवाहः , तोयपातः , अवनी , भूभृत् , तटिनी , अरण्यम् ।

**परिपृच्छा** - १. यमुना २.गोवर्धनपर्वतः ३. घनश्यामः ।

**सम्पादिका –** वरदा सौकूर
**पृष्ठरचना –** वन्दना बळवळ्ळी
**सम्पादकीयसमितिः –** शीला कळावर , दुर्गा कुम्टा , अर्चना काप्राडक , सुधा कार्नाड , शिल्पा मुदूर
**सम्पादकीयसाहाय्यम् –** तेजश्री बैलूर

**अभिप्रायं तथा लेखं प्रेषयितुम् इच्छुकानाङ्कृते सम्पर्कः -**
**Email id:** girvanapatrika@chitrapurmath.net.in (लेखार्थं शब्दमर्यादा-२५०)

**संस्कृताध्ययनार्थं जालाधारित-प्रबोधवर्गस्य (online classes) पञ्जीकरणार्थं सम्पर्कः -**
**Email id:** prabodhah@chitrapurmath.net.in